# ‘अनेकमन्यपदार्थे’ इति सूत्रगतदलसार्थक्यविचारः

**कुमारखतिवडाः**

*उपप्राध्यापकः,नेपालसंस्कृतविश्वविद्यालयः, वि.पी.को.सं.विद्यापीठम्*

kumarsir750@gmail.com

Orcid : https://orcid.org/0009-0001-1250-8405

https://doi.org/10.3126/anveshana.v4i1.96915

**शोधसारः**

*आलेखोऽयमष्टाध्यायीस्थस्य “अनेकमन्यपदार्थे” इति सूत्रस्य विश्लेषणाय प्रस्तुतो विद्यते। समासविधायकेषु सूत्रेष्वन्यतमिदं सूत्रमिदं बहुव्रीहिसमासं विधत्ते। स च समासः प्रथमाविभक्त्यन्तसमानाधिकरणविषयकोऽस्ति। प्रथमाविभक्त्यन्तसमानाधिकरणन्तु तत्पुरूषस्य द्विगुसमासस्यापि सत्त्वेनास्य समासस्य पार्थक्यञ्चान्यपदार्थे वर्तमानं सदेव पदं समस्यत इति स्पष्टीभवति। तत्पुरूषस्योत्तरपदार्थप्राधान्याद्बहुब्रीहेश्चान्यपदार्थस्य प्राधान्यात्पार्थक्यं सुस्पष्टमेव। तत्पुरुषस्तु द्विपदसमासोऽस्ति, बहुब्रीहिस्त्वनेकपदसमासोऽपि भवितुं शक्नोति। आलेखस्य निर्माणाय पुस्तकालयमाध्यमेन प्राथमिकद्वितीयकसामग्रीणां सङ्कलनं विधाय वर्गीकरणं सम्पाद्य वर्णनात्मकविश्लेषणात्मकतुलनात्मकविधिभिरनुसन्धानं विहितमस्ति। अष्टाध्याय्याः सर्वस्य सूत्रस्य एकैकमक्षरमपि सार्थकमस्तीति महाभाष्यकारेणोक्तम्। एकमक्षरमपि निरर्थकं न भवेदिति विचार्य सूत्रप्रणयनं कृतमस्ति। सूत्रगतानां प्रत्येकं दलानां ग्रहणस्य विशिष्टं प्रयोजनमस्ति। महाभाष्ये प्रत्येकं दलानां ग्रहणप्रयोजनसन्दर्भे पूर्वमकृतेऽपि कार्यं चलतीत्युक्त्वान्ते च तस्य सार्थक्यविषये ग्रहणौचित्यमपि प्रतिपादितमस्ति। अतोऽस्मिँल्लेखे अनेकम्, अन्यः, पदम्, अर्थः इत्यादीनां सूत्रगतदलानां ग्रहणप्रयोजनमुपयोगित्वञ्च विविधोदाहरणैः प्रदर्श्य स्थापितमस्ति। बहुव्रीहिः समानाधिकरणानामेव, मत्वर्थे बहुव्रीहिः इत्यादीनि वचनानि च न कथनीयानि, अनभिधानस्यैव स्वीकरणेन सर्वेष्टसिद्धिर्भवतीति वर्णितम्। तथा चेदं सूत्रं बहुब्रीहिसमासविधायकं प्रमुखं सूत्रं वर्तते। प्रथमासमानाधिकरणपदयोर्बहुब्रीहिसमासकरणाय पाणिनिना रचितमिदं सूत्रं पाणयिनीयव्याकरणस्य महत्त्वाधायकं सूत्रमस्ति। अनुप्रयोगविषयेऽप्यर्थग्रहणसामर्थ्यान्न दोष इति निष्कर्षोऽत्र स्थापितो वर्तते।*

**शब्दकुञ्जी :** बहुव्रीहिः, वृत्तिः, समासः, सूत्रम्, शब्दः।

## विषयपरिचयः

वेदस्याङ्गरूपस्य पाणिनीयव्याकरणस्य समस्तवाङ्मयेषु सर्वातिशयं महत्त्वमुररीक्रियते। शब्दानुशासनेन शब्दशास्त्रेण नियमनं विना लौकिको व्यवहारोऽपि सम्यक्तया सञ्चालयितुं न शक्यते। लौकिकानां वैदिकानां च

शब्दानां शब्दानुशासनार्थं व्याकरणस्यमावश्यकमस्ति।। व्याकरणशब्दस्य विग्रहः खलु व्याक्रियन्ते व्युत्पाद्यन्तेऽसाधुभ्यो विविच्य साधुत्वेन बोध्यन्ते शब्दा अनेन असौ इति व्याकरणम् इत्यस्ति। साधुशब्दानां व्युत्पादनेनासाधुशब्दानामपाकरणं व्याकरणशास्त्रस्य कार्यमस्ति। प्रकृतिप्रत्ययौ प्रकल्प्यानादिकालात्प्रचलितानां साधुशब्दानां साधुत्वेनान्वाख्यानं व्याकरणं करोति। पाणिनीयं व्याकरणञ्चाधुनिके जगति सर्वोत्कृष्टं सर्वव्याकरणशास्त्रेषु लघु व्याकरणमस्ति। बिन्दौ सिन्धुः इति लोकोक्तिवदस्मिन्व्याकरणे पाणिनिना यथेष्टं शब्दानां सङ्कलनं विधाय सूत्रं विहितम्। शब्दव्युत्पादनञ्च मूलशब्दात्(प्रकृतेः) तिङ्-कृत्-तद्धितादिभिर्भवति। भवतीत्यादौ भूधातोः(मूलशब्दात्) तिङ्प्रत्ययविधानात् तिङन्तपदानां व्युत्पत्तिर्भवति। तथैव गमनम् इत्यादौ मूलशब्दात्(गम्धातोः) कृत्प्रत्ययस्य ल्युटो विधानात् कृदन्तानां शब्दानां व्युत्पत्तिर्भवति। तद्धितान्तानां औपगवादीनान्तु मूलप्रातिपदिकाद् उपगोरित्यादेरणादिप्रत्ययविधानेन निष्पादनं भवति। यद्यपि समासे नवीनस्य शब्दस्य निर्माणं न भवति, तथैव द्वित्वप्रक्रियायामपि नवीना व्युत्पत्तिर्न भवति, परन्त्वनेकशब्दा एकशब्दतां यान्तीति विचित्रचमत्कारो दृश्यते। तदपि नवीनं मन्तुं शक्यते। समासस्यापि व्याकरणभेदेनानेके भेदाः सन्ति। समासप्रकरणमप्यन्तं महत्त्वपूर्णं वर्तते, समासप्रकरणानभिज्ञः यथार्थं ज्ञातुं न प्रभवति। शाब्दिकाः समासे विलक्षणशक्तिं स्वीकुर्वन्ति। राजपुरूषादौ व्यपेक्षावादिनो मीमांसकनैयायिकाश्चावयवार्थं स्वीकुर्वन्ति, तेषां मतानुसारञ्च शब्दानां संहतिरेव समासः। परन्तु शाब्दिकानां मते तु पङ्कजादिशब्दवत् अवयवशक्तिं तिरस्कृत्य समुदायशक्त्यैवार्थस्य प्रतीतिर्भवति। अत एव शाब्दिकानां मते न शब्दानां संहतिमात्रमपितु विलक्षणार्थप्रतिपादनमपि समासेनैव भवतीत्यवगन्तव्यम्। पाणिनीयं व्याकरणं खल्वाष्टाध्यायीग्रन्थरूपमस्ति ग्रन्थेऽनेकेषु सूत्रेष्वन्यतमं सूत्रं खलु 'अनेकमन्यपदार्थे' इति सूत्रम्। तत्राष्टस्वध्यायेषु विविधेषु प्रकरणेषु च द्वितीयाध्यायस्य द्वितीयपादस्य चतुर्विंशतितमं सूत्रं खल्विदम् अनेकमन्यपदार्थे। समासप्रकरणे सूत्रमिदमागच्छति। अव्ययीभाव-तत्पुरुष-कर्मधारय-बहुव्रीहि-द्वन्द्वभेदेन बहुविधः। तत्र बहुव्रीहिसमासविधायकं सूत्रमिदम् "अनेकमन्यपदार्थे"। सूत्रस्यास्यैव विवेचनं वर्ततेऽस्मिन्नालेखे। अतोऽस्य सूत्रस्यार्थः, दलप्रयोजनम्, उपयोगित्वम् इत्यादीनां विषयाणां विस्तृतं व्याख्यानं क्रियते।

अस्मिन्नालेखे 'अनेकमन्यपदार्थे' इति सूत्रस्यार्थः कः ?, कानि च सूत्रदलप्रयोजनानि ?, सूत्रोपयोगित्वं कुत्र ? इत्येतासु समस्यासु केन्द्रीभूयानुसन्धानं विहितमस्ति। उपर्युक्तां प्रश्नात्मिकीं प्राज्ञिकीं शोधसमस्यां पुरस्कृत्य 'अनेकमन्यपदार्थे' इति सूत्रस्यार्थः, दलप्रयोजनम्, उपयोगित्वम् इत्येतेषां विश्लेषणं प्रस्तुतस्यानुसन्धात्मकलेखस्योद्देश्यमस्ति। अस्यानुसन्धानस्य पूर्वकार्यसन्दर्भे पाणिनिसूत्ररूपेणास्य सन्निवेशात् सिद्धान्तकौमुदी, काशिका, न्यासः इत्यादिषु ग्रन्थेषु व्याख्यारूपेण सोदाहरणमर्थः प्रदर्शितोऽस्ति। तत्र विविधासु व्याख्यासु कृतास्वपि दलग्रहणस्यैव सार्थक्यविषये पृथगनुसन्धानं कृतं न विलोक्यते। अत एतदेव मेऽन्तरालमिति निश्चित्यानुसन्धानं विहितमस्ति। तेषां ग्रन्थानां सहायकत्वेनोपयोगः कृतोऽस्ति।

## अध्ययनविधिः

प्रस्तुतमिदमनुसन्धानं गुणात्मकमस्ति। सूत्रस्य तत्सम्बद्धस्यार्थस्य च पाठस्य विश्लेषणेनानुसन्धानकार्यस्य विधानात्पाठविश्लेषणविधिः स्वीकृतो वर्तते।

अध्ययनस्य विषयोऽयं पाणिनीयव्याकरणान्तर्गतो वर्तते। पाणिनिना विरचितेऽष्टाध्यायीग्रन्थे विविधानि प्रकरणान्यनेकसूत्राणि च सन्ति। तत्र समासप्रकरणस्य 'अनेकमन्यपदार्थे' इति सूत्रमेवास्याध्ययनस्य क्षेत्रमस्ति। तथा च तत्सूत्राङ्गोपाङ्गभूतानि ग्रन्थरत्नानि महाभाष्यादीनि, तत्रोद्घाटितानि चास्य क्षेत्रान्तर्गतानि सन्ति। एवञ्चैतत्सूत्रातिरिक्ता विषयाश्चाध्ययनस्य सीमारूपाः सन्ति।

प्रस्तुतस्य शोधकार्यस्य सम्पादनाय मुख्यसामग्रीः सङ्कलयितुं विशेषरूपेण पुस्तकालयमाश्रितोऽस्ति। 'अनेकमन्यपदार्थे' इति सूत्रविषयसम्बद्धा विषया अष्टाध्यायी, महाभाष्यम्, वाक्यपदीयम् इत्यादयो ग्रन्था अस्य प्रमुखस्रोतांसि सन्ति। एवमेतत्सूत्रसम्बद्धा व्याख्यानात्मकाष्टीकात्मकाः, विश्लेषणात्मकाश्चान्ये ग्रन्था आलेखाश्च द्वितीयसामग्रीत्वेन स्वीकृता विद्यन्ते। यथायथं वैद्युतान्तर्जालादिमाध्यमेन द्वितीयकसामग्रीणां सङ्कलनमपि विहितमस्ति।

सङ्कलितसामग्रीणां स्रोतोनिदर्शने प्राचीनग्रन्थानामुद्धरणक्रमे ग्रन्थसूत्रसंख्यादिसूचकः शास्त्रीयविधिस्तथा गद्यात्मकानां ग्रन्थानां तथा गद्यात्मकसामग्रीणां स्रोतोनिदर्शने लेखकमितिपद्धतिः स्वीकृतोऽस्ति। अस्य शोधस्य विषयवस्तूनां विश्लेषणाय व्याख्यानाय च वर्णनात्मकाविश्लेषणात्मकविधी स्वीकृतौ वर्तेते। महाभाष्याष्टाध्यायीसिद्धान्तकौमुदीस्थानां सूत्रार्थप्रयोजनविषयस्य प्रतिपादनाय च तुलनात्मकविधिनाप्यनुसन्धानं विहितं वर्तते। गम्भीरविषयचिन्तने च चिन्तनमननादिद्वारा विश्लेषणं विधाय निष्कर्षः प्रस्तुतो विद्यते।

## सैद्धान्तिकपर्याधारः

अस्मिन्नध्ययने पाणिनिकृताष्टाध्यायी-महाभाष्य-वाक्यपदीयादिग्रन्थेभ्यस्तद्विवरणभूतग्रन्थेभ्यश्च सामग्रीसङ्कलनं विहितमस्ति। विशेषतो त्रिमुनिगदितबहुव्रीहिसमासबोधकः 'अनेकमन्यपदार्थे' इति सूत्रगतः सिद्धान्त एवास्य सैद्धान्तिकपर्याधारत्वेनाङ्गीकृतो विद्यते।

## विषयविश्लेषणम्

उपरि संकेतितं सैद्धान्तिकपर्याधारमाधृत्यात्र विभिन्नोपशीर्षकेषु 'अनेकमन्यपदार्थे' इति सूत्रगतदलसार्थक्यविषयक-विश्लेषणं क्रियते।

## सूत्रार्थस्तदुपयोगित्वञ्च

पाणिनीयाष्टाध्याय्या द्वितीयाध्यायस्य द्वितीयपादस्य चतुर्विंशं सूत्रमिदम्। 'शेषो बहुव्रीहिः'(अष्टाध्यायी, ई.२००९, २/२/२३), 'प्राक्कडारात्समासः'(अष्टाध्यायी, ई. २००९, २/१/३) इति च अधिकृतम्। 'सुबामन्त्रिते पराङ्गवत्स्वरे'(अष्टाध्यायी, ई. २००९, २/१/२) इति सूत्रात् सुबित्यनुवर्तते। सह सुपा इति तु नानुवर्तते, अनेकग्रहणसामर्थ्यात्। परस्परं सुबन्तं समस्यते इत्यर्थलाभो भवति। अनेकपदग्रहणेन सह सुपा इत्यतः द्वितीयसुब्ग्रहणं नावश्यकम्, अनेकं सुबन्तमेवेत्यर्थलाभात्। अतः केवलं प्रथमं सुप्पदमेवानुवर्तते, अनेकपदानुरोधात्। पदेन प्रकृत्यर्थोपसर्जनः प्रत्ययार्थोऽभिधीयत इति विभक्त्यर्थस्य प्राधान्यात्तस्यैवान्यपदार्थग्रहणेन ग्रहणमिति भावः (पदमञ्जरी, ई. १९८१, २।२।४ व्याख्या) शेषो बहुव्रीहिः इत्यतः शेषग्रहणात्प्रथमान्तमिति लाभः। शेषश्च कः इति विषये शेषो बहुव्रीहिः इति सूत्रव्याख्यानक्रमे 'उपयुक्तादन्यः शेषः, शेषः समासो बहुव्रीहिसञ्ज्ञा भवति, कश्च शेषः ? यत्रान्यः समासो नोक्तः' (काशिका, ई. २०१०, ८२९(सू.सं.) इत्युक्त्वा प्रथमार्थस्य शेषार्थ उक्तः। ततश्च अनेकं प्रथमान्तं सुबन्तमन्यपदार्थे वर्तमानं वा समस्यते, स बहुव्रीहिरिति (सिद्धान्तकौमुदी, ई. २०२०, ८३० सूत्रसंख्या) सूत्रार्थः फलितः। अप्रथमाविभक्त्यर्थे बहुव्रीहिर्भवति, तथा च समानाधिकरणानामेव बहुव्रीहिरित्यपि अनेकान्यपदप्रयोगेण फलितार्थो भवति। अत्रान्यशब्देनोपस्थितप्रथमान्तातिरिक्तपदार्थस्यावगमात् प्रथमार्थमेकं वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिर्भवतीत्यर्थो जायते।

प्रथमाविभक्त्यर्थे तु न भवतीत्युक्तम् अतः प्रथमान्तातिरिक्तस्य पदस्यार्थे वर्तमानं समस्यते इत्यर्थाश्रयणेनात्रोपस्थितस्य प्रथमान्तार्थस्य विद्यमानत्वात् समानाधिकरणे स्थितेऽपि वृष्टे देवे गतः इत्यत्र बहुव्रीहिर्न भवति। व्यधिकरणानामपि बहुव्रीहिसमासो न भवति। यथा- पञ्चभिर्भुक्तमस्य (महाभाष्यम्, २०२०, २/२/२४ सूत्रव्याख्या) अत्र समस्यमानयोः पदयोर्मध्ये भुक्तपदस्य प्रथमान्तत्वेऽपि पञ्चपदस्य तृतीयान्तत्वेनासमानाधिकरणत्वेनाप्रथमाविभक्त्यर्थे वर्तमानेऽपि बहुव्रीहिर्न सम्भवति। अत एव चित्रा गावो यस्य सः चित्रगुरित्युदाहरणम्। अत्र समानाधिकरणविभक्तीनां प्रयोगे षष्ठीविभक्त्यर्थे बहुव्रीहिसमासोऽस्ति।

बहुव्रीहेरुदाहरणप्रसङ्गे द्वितीयार्थबहुव्रीहेरुदाहरणं प्राप्तोदकः (ग्रामः) इत्यस्ति। प्राप्तमुदकं यं ग्रामं स इति विग्रहः। द्वितीयाविभक्त्यर्थे वर्तमानमेव प्राप्तोदकपदमत्र समस्यते। प्र-उपसर्गपूर्वक-आप्धातोः "गत्यर्थाकर्मकश्लिषशीङ्स्थाऽऽसवसजनरुहजीर्यतिभ्यश्च" (अष्टाध्यायी, ई. २००९, ३/४/७२) इत्यनेन कर्तरि क्तप्रत्ययः। अतो विग्रहवाक्ये ग्रामस्य विशेषणतया द्वितीयान्तत्वेन च ग्रामकर्मकप्राप्तिकर्तृ उदकमित्येवं प्राप्तस्योदकस्य विशेष्यतया बोधः। समासे कृते तु प्राप्तोदकः इत्यस्माद् एकार्थीभावमहिम्ना उदककर्तृकप्राप्तिकर्मीभूतो ग्राम इत्येवं ग्रामस्य विशेष्यतया, तद्विशेषणतया तु प्राप्तस्योदकस्य बोधो भवति। विग्रहे समासे च परस्परं विशेषणविशेष्यव्यत्यासो भवति। एवमेवान्यदुदाहरणेष्वपि ज्ञातव्यम्।

तृतीयार्थबहुव्रीहेश्चोदाहरणं खलु ऊढरथः (अनड्वान्)। उढो रथो येन सः इति विग्रहः। अत्र वह्-धातोः कर्मणि क्तप्रत्ययः। विग्रहवाक्यस्यार्थश्चानडुत्कर्तृकोद्वहनकर्मीभूतो रथः इति अनडुहः विशेषणत्वेन रथस्य च विशेष्यत्वेन बोधो भवति। समासे च रथकर्मकोद्वहनकर्ताऽनड्वान् इति बोधो व्यत्यासेन भवति। चतुर्थ्यर्थबहुव्रीहौ उदाहरणरूपेण उपहृतपशू रुद्रः इत्यागच्छति। उपहृतः पशुर्यस्मै सः इति विग्रहः। अत्र पशोर्विशेष्यत्वेन रुद्रस्य विशेषणत्वेन च रुद्रसम्प्रदानकोपहरणकर्मीभूतः पशुरिति विग्रहार्थोऽवगम्यते। समासे तु पशुकर्मकोपहरणसम्प्रदानीभूतो रुद्रः इत्यर्थः सम्पद्यते। पञ्चम्यर्थबहुव्रीहौ उद्धृतौदना (स्थाली) इत्युदाहरणं निगदितमस्ति। उद्धृत ओदनः यस्याः सा इति विग्रहार्थः। स्थाल्यवधिकोद्धरणकर्मीभूत ओदन इति विग्रहार्थः। ओदनकर्मकोद्धरणावधिः स्थाली इति समासार्थः। षष्ठ्यर्थबहुव्रीहौ च पीताम्बरो हरिरित्युदाहरणम्। पीतमम्बरं यस्य सः इति विग्रहः। हरिसम्बद्धकर्तृभूतं पीताम्बरम् इति विग्रहार्थः। समासे तु पीताम्बराश्रयीभूतो हरिरित्यर्थबोधः। सप्तम्यर्थबहुव्रीहौ वीरपुरूषको ग्राम इत्युदाहरणम्। वीराः पुरूषा यस्मिन् सः इति विग्रहः। ग्रामाधिकरणककर्तृभूतो वीरपुरूषः वीरपुरूष इति विग्रहार्थः। वीरपुरूषकर्तृकाश्रयीभूतो ग्राम इति समासार्थः। उपर्युक्तेषु सर्वेषु स्थलेषु विग्रहार्थे समासार्थे च विशेषणविशेष्ययोर्व्यत्यासोऽस्ति।

एवम्प्रकारेण प्रथमार्थातिरिक्तेषु द्वितीयार्थेषु वर्तमानानां सुबन्तानां बहुव्रीहिसमासस्योदाहरणानि प्रदर्शितानि। एतदतिरिक्तेषु स्थलेष्वपि 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः', 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरलोपः' इत्यादिवार्तिकानां वचनमपि भाष्ये विद्यमानं वर्तते (महाभाष्यम्, २०२०, २/२/२४ सूत्रव्याख्या)। तेन प्रपर्णः, अपुत्रः इत्यादयः सिद्ध्यन्ति।

**दलग्रहणविमर्शः**

अनेकमन्यपदार्थे इत्येतस्मिन् सूत्रे अनेकम्, अन्यः, पदः, अर्थः इत्येतानि दलानि सन्ति। तेषां ग्रहणं किमर्थमिति प्रश्नो जागर्ति। तेषां दलानां ग्रहणप्रयोजनञ्चाधो विमृश्यते।

***पदग्रहणम्***

सूत्रेऽनेकमन्यार्थे इत्युच्यमानेऽपि भेदप्रतियोगित्वं स्वपदार्थस्यैवेत्यतः स्वपदार्थव्यतिरिक्तोऽन्यपदार्थः पर्युदासविधिना पदार्थ एवेति विना पदग्रहणमपि अन्यपदार्थग्रहणं भवतीति नार्थः पदग्रहणेन इति जिज्ञासा वर्तते। यतो हि तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमेव सादृश्यम्। पर्युदासः सदृग्ग्राही भवतीति स्वपदार्थस्य भेदेनान्यपदार्थस्य लाभः संभवेदेव। लाभे सत्यपि पदग्रहणं वाक्यार्थे बहुव्रीहिसमासाभावाय कर्तव्यम्। यथा- अनेकमन्यार्थे इतीयत्युच्यमाने वाक्यार्थेऽपि बहुव्रीहिः स्यात्- यथा मे माता तथा मे पिता सुस्नातं भो इति (महाभाष्यम्, २०२०, २/२/२४ सूत्रव्याख्या)। अत्रोच्यते पदग्रहणाभावे 'यथा मे माता तथा मे पिता सुस्नातं भोः' इत्यादिवाक्यार्थेऽन्यार्थस्य स्नानरूपार्थस्य वर्तमानत्वात् यथा मे माता, तथा मे पिता इत्यनयोर्वाक्ययोर्मिथः बहुव्रीहिसमासप्रसङ्गः स्याद्। अत्र केनचित् कश्चित्पृष्टः कुलशीलादिना कीदृशस्तव पितेति, तस्मै वक्तीति यथा मे मातेति। 'यथा मे माता इत्येतानि पदानि

तथा मे पिता इत्यन्तस्य वाक्यस्यार्थं गमयन्तीति समासप्रसङ्गः' (महाभाष्यप्रदीपः, २०२०, २/२/२४ सूत्रव्याख्या)। यथा मे माता तथा मे पिता इति पाठान्तरं। तत्र स्नाहीति कश्चिदादिष्टः, यथा मे माता तथा मे पिता इत्याह। तस्य 'कुलशीलादिना यथा मे माता शुद्धा तया मम पितेत्यभिजनशुद्धिरपि स्नानमेव किं बाह्यस्नानेन' इत्यर्थः। अत एव पदग्रहणाभावे यथा मे माता तथा मे पिता इति पदानि सुस्नातं भोः इत्यन्तस्य वाक्यस्यान्यार्थं गमयन्तीति बहुव्रीहिसमासापत्तिरित्यतस्तत्र समासनिवारणार्थं पदग्रहणं कर्तव्यम्। तथैवान्यस्मिन्नप्युदाहरणे कश्चित्कञ्चिन्नद्यां सिष्णासुमाह- नद्यां ग्राहाः सन्तीति, उतानि पदानि तस्मात्तत्र मा स्नासीरिति वाक्यार्थं गमयन्तीति तेषां बहुव्रीहिसंज्ञा प्राप्नोति। अतो वाक्यार्थे बहुव्रीहिसमासाभावाय पदग्रहणं कर्तव्यम्। 'अन्यपदार्थश्चात्र व्यङ्ग्य इति बोध्यम्' (महाभाष्यप्रदीपोद्योतस्तत्रस्थः)।

***अन्यग्रहणम्***

ननु सूत्रेऽस्मिन् अनेकं पदार्थे इत्येव सूत्रं वाच्यम्। यतो हि समस्यमानपदानां पूर्वोपस्थितित्वेनान्तरङ्गत्वात् स्वपदार्थे एव समासे सिद्धे पदार्थग्रहणसामर्थ्यात् अन्यपदार्थो लभ्यत इति अन्यग्रहणं न कर्तव्यम्। अत्रोच्यते- अनेकं पदार्थे इत्युच्यमाने पदार्थग्रहणसामर्थ्यात् व्याप्तिन्याय आश्रीयेत, नत्वन्तरङ्गन्याय इति। तथा च स्वपदार्थे अन्यपदार्थे चोभयत्र बहुव्रीहिः स्यात्, राजपुरुष इति। राजानं पुरुषमित्यत्र सावकाशस्तत्पुरुषः। बहुपदे प्रियपञ्चगुरित्यादौ सावकाशो बहुव्रीहिः। ततो राजा चासौ पुरुषश्च इति प्रथमान्तेन विग्रहे परत्वात् स्वपदार्थेऽपि बहुव्रीहिप्रसङ्गः। अतः स्वपदार्थे बहुव्रीहिव्यावृत्त्यर्थमन्यपदग्रहणम् (महाभाष्यम्, २०२०, २/२/२४ सूत्रव्याख्या)। कृते चान्यग्रहणे बहुव्रीहितत्पुरूषयोर्विषयविभागो यथा विज्ञायेत, स्वपदार्थे हि सावकाशं तत्पुरूषं परत्वादन्यपदार्थे बहुव्रीहिर्बाधते। तथा चापरमपि फलमस्ति, एकसंज्ञाधिकारपक्षेऽपि असति त्वन्यग्रहणे कण्ठेकाल इत्यादौ व्यधिकरणपदे, बहूनां समुदाये च सावकाशं बहुव्रीहिं स्वपदार्थ इवान्यपदार्थेऽपि नीलोत्पलं सर इत्यादौ समानाधिकरणे पदद्वयस्थले तत्पुरूषो बाधेत (महाभाष्यम्, २०२०, २/२/२४ सूत्रव्याख्या)। अत उभयत्र बाध्यबाधकभावेन विषयविभागस्यानिश्चयः स्यात्। न च प्रथमान्तपदद्वयेन विग्रहे स्वपदार्थे बहुव्रीहेरपेक्षया समानाधिकरणस्तत्पुरुषो (कर्मधारयः) भवति, अन्यपदार्थे बहुपदे बहुव्रीहेः सावकाशत्वेन निरवकाशस्य कर्मधारयस्य पदद्वये प्रवृत्तिसत्त्वेनान्यपदाभावेऽपि बहुव्रीहेर्न प्रसङ्ग इति वाच्यम्, एकसंज्ञाधिकारपक्ष एव तथाऽश्रयितुं युक्तत्वात्। अयं भावः – 'आकडारादेका संज्ञा'(अष्टाध्यायी, ई. २००९, १/४/१) इति सूत्रे आकडारादेका इति प्रथमः पक्षः। अस्मिन् पक्षे केवलं 'कडाराः कर्मधारये' (अष्टाध्यायी, ई. २००९, २/२/३८) इत्यतः प्रागेकैव संज्ञा भवति। अतः पदद्वये स्वपदार्थे कर्मधारयसमासस्य प्रवृत्तिमत्त्वेन एकसंज्ञाधिकाराद् बहुव्रीहेर्निषेधावगमेऽन्यपदस्याभावेऽपि कार्यं चलतीति दृश्यते। परन्तु यदा प्राक्कडारात्परं कार्यमिति द्वितीयः पक्ष आश्रीयते तर्हि राजपुरुष इत्यत्र बहुव्रीहि-तत्पुरुषयोः प्राप्तयोः परं कार्यत्वेन कर्मधारयात्परत्वेन बहुव्रीहिसमासापत्तिः स्यात्तथैवारम्भसामर्थ्याच्च एकसंज्ञाधिकाराभावात्तत्पुरुष इत्येवमुभयोः संज्ञयोः समावेशात्तत्तन्निमित्तकस्वरसमासान्तानां पर्यायतापत्तिर्भवति। अतोऽत्र स्वपदार्थे बहुव्रीहेर्वारणायान्यपदमावश्यकम्। एकसंज्ञाधिकारेऽपि विषयविभागज्ञानाय

नीलोत्पलं सर इत्यादौ तत्पुरूषस्य व्यावृत्तयेऽन्यग्रहणमावश्यकमिति ज्ञायते। अत्रोच्यते – बहुव्रीहिसमासविधौ 'शेषो बहुव्रीहिः'(अष्टाध्यायी, ई. २००९, २/२/२३) इत्यस्मात् शेष इत्यधिकारात् राजपुरुष इत्यत्र चाशेषत्वान्न बहुव्रीहिः। अयमर्थो द्वन्द्वस्य विधानात् पूर्वोत्तरपदार्थप्राधान्ये अव्ययीभावतत्पुरुषयोर्विधानात्, उभयपदार्थप्राधान्ये अन्यपदार्थप्राधान्यस्यैव शेषत्वात् तत्रैव बहुव्रीहिरिति फलितम्। अत एव उत्तरपदार्थप्राधान्यस्य तत्पुरूषसमासत्वादत्र बहुव्रीहेरापत्तिर्न दृश्यते। शेषाधिकारादेव कार्यं चलति, यत्र शेषस्तत्रैव बहुव्रीहिः, राजपुरूष इत्यादौ अन्यपदार्थप्राधान्यस्य शेषस्यासत्वान्न बहुव्रीहेरापत्तीति अन्यपदग्रहणाभावेऽपि दोषस्य वारणं संभवति।

नन्वत्रान्यपदार्थमपाकृत्य शेषग्रहणे क्रियमाणे सङ्ख्या-समानाधिकरण-नञ्समासेषु दोषः स्यात्। यथा च महाभाष्ये- 'तत्र शेषवचनाद्दोषः संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहिप्रतिषेधः'इति (महाभाष्यम्, २०२०, २/२/२४ सूत्रव्याख्या) । द्वीरावतीको देशः इत्यत्र 'नदीभिश्च'(अष्टाध्यायी, ई. २००९, २/१/२०) इत्यव्ययीभावः, वीरपुरुषको ग्राम इत्यत्र 'पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च'(अष्टाध्यायी, ई. २००९, २/१/५८) इति समानाधिकरणसमासः, अब्राह्मणको देश इत्यत्र 'नञ्' (अष्टाध्यायी, ई. २००९, २/२/६) इति तत्पुरुषश्च प्राप्नोतीत्यव्याप्तिः। अतः शेषग्रहणं न कार्यम् (महाभाष्यप्रदीपः,२०२०, २/२/२४ सूत्रव्याख्या)। अत एव प्राक्कडारात्परं कार्यमिति पक्षेऽपि स्वपदार्थे बहुव्रीहिनिवृत्त्यर्थमन्यग्रहणं कर्तव्यमेव। एकसंज्ञाधिकारपक्षेऽपि अन्यग्रहणं कार्यमेव। स्वपदार्थे तत्पुरुषो बहुव्रीहिं यथा बाधते तथा अन्यपदार्थेऽपि बाधेत। यथा- नीलोत्पलं सर इत्यत्रान्यपदार्थवृत्तित्वेऽपि पदानां विशेषण-विशेष्यभावापन्नत्वेन तत्पुरुषो बहुव्रीहेर्बाधकः स्यात्। कण्ठेकाल इत्यादौ समानाधिकरणसमासाप्रवृत्तियोग्ये चारितार्थ्यात् निरवकाशतापि बहुव्रीहेर्नास्ति। कृते त्वन्यग्रहणे स्वपदार्थे सावकाशं तत्पुरुषं परत्वाद्बहुव्रीहिर्बाधत इति न दोषः। अत एकसंज्ञाधिकारे तथा परंकार्यपक्षेऽप्युभयत्रान्यग्रहणस्यौचित्यं वरीवर्ति। शेषग्रहणेन कार्यं कृते तु संख्यानञ्समासादिषु बहुव्रीहिप्रतिषेधः प्राप्तो भवतीति यथोक्तमेव न्याय्यम्।

***अनेकग्रहणम्***

अनेकमन्यपदार्थे सूत्रे अनेकग्रहणं किमर्थं क्रियते ?, न हि प्रथमान्ते एकपदे समासो माभूदित्येतदर्थमनेकग्रहणं वक्तुं युक्तियुक्तम्, 'समर्थः पदविधिः' इति सूत्रात् सति सामर्थ्ये समासो भवतीत्यर्थात् एकपदे समासासम्भवः, व्यर्थगर्भत्वात् सामर्थ्यस्य। ननु सर्पिषोऽपि स्यात्, गोमूत्रस्यापि स्यादित्यादिप्रयोगे अपि-शब्दस्यान्यपदार्थ (बिन्द्वर्थे) वर्तमानस्यैकस्यापि समासप्रसङ्गः, ततश्च कप् स्यात्, अत्र न च एकपदे सामर्थ्याभाव इति वाच्यम्, बहिर्भूतेन स्यादिति पदेन सामर्थ्यसत्त्वात्। अत्रोच्यते - सुप् सुपा इत्यनुवृत्तिसामर्थ्यात् सुबन्तं सुबन्तेन समस्यत इत्यर्थलाभेन एकस्य समासाभावः। समासे द्वयोः पदयोर्वा बहूनां पदानामावश्यकत्वात्। तथा च समासस्य षड्विधत्वकथने सुबन्तस्य सुबन्तेन, सुबन्तानां तिङन्तादिभिश्च समासो भवतीत्युक्तमस्ति। यथा-

*सुपां सुपा तथा नाम्ना धातुना च तिङां तिङा।*

*सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥(वैयाकरणभूषणसारः,२०१९, श्लो. २८)*

एतेन समासो भवितुं पदार्थद्वयस्योपस्थितिरनिवार्येति सिद्धम्। सुप्सुपा इत्यनुवृत्तिविषये तु यद्यपि 'उपपदमतिङ्' इति सूत्रे अतिङ्ग्रहणेन 'सुप्सुपा' इत्यस्य निवृत्तिर्ज्ञापिता तथापि 'कुगतिप्रादयः', 'उपपदमतिङ्' इति सूत्रद्वये एव सुप्सुपेत्यस्यासम्बन्धः। अतोऽत्र बहुव्रीहावपि द्वयोः पदयोर्मध्ये समासस्तु सुप्सुपा इत्यतोऽर्थलाभाद्भवत्येव। अतश्च बहूनामपि सुबन्तानां समासार्थमनेकग्रहणयोजनं वक्तव्यम्। यथा चोक्तम्-

*'सुसूक्ष्मजटकेशेन सुगजाजिनवाससा।*

*समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति'* ॥(महाभाष्यम्, २०२०,२/२/२४ सूत्रव्याख्या)

इति समर्थसूत्रे भाष्योहरणं प्रदर्शितं बहुपदबहुव्रीहेः। सूत्रे अनेकग्रहणाभावे सुप्सुपात्यनुवृत्तेः गुणे सङ्ख्यायाः विवक्षणात् द्वयोरेव समासः स्यात्। अत्र सुसूक्ष्मजटकेशेन- सुष्ठु सूक्ष्मा जटाः केशा यस्येति चतुष्पदबहुव्रीहौ 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (अष्टाध्यायी, ई. २००९, ६/३/६३) इति बहुलवचनाद्ध्रस्वत्वम्, अथवा सुष्ठु सूक्ष्मा जटा येषु ते सुसूक्ष्मजटास्तादृशाः केशा यस्येति पुनर्बहुव्रीहौ कृतेऽपि सिध्यति। एवमेव सुगजाजिनवाससा- सुष्ठु गजाजिनं वास आच्छादनं यस्य तेन सुगजाजिनवाससा। अत्र श्लोकपूरणार्थं तृतीयानिर्देशोऽस्ति। उपर्युक्तेषूदाहरणेष्वनेकपदेष्वपि बहुव्रीहिसमासकरणार्थमनेकग्रहणमावश्यकम्। तथा च द्वन्द्वसमासविधायके 'चार्थे द्वन्द्वः' (अष्टाध्यायी, ई. २००९, २/२/२९) इति सूत्रे अनेकग्रहणानुवृत्तिसत्त्वाद् द्वन्द्वो बहूनामपि भवति। यथा- प्लक्षन्यग्रोधधवखदिरपलाशाः। अतोऽनुवृत्त्यर्थमपि ग्रहणमावश्यकम्।

ननूपर्युक्तप्रयोजनं खल्वन्यथासिद्धम्, 'तद्धितार्थोत्तरपदसमाहारे च' (अष्टाध्यायी, ई. २००९, २/१/५१) इति सूत्रेण उत्तरपदे परतः पूर्वयोः पदयोः समासो विधीयते। उत्तरपदशब्दश्च समासस्य चरमावयवे रूढोऽस्ति। बहूनां समासाभावे पञ्चगवधन इत्यत्र धनशब्दस्य उत्तरपदत्वं सुदुर्लभं, अत एवेदं सूत्रमेव बहूनां पदानां समासं ज्ञापयतीत्यनेकग्रहणप्रयोजनं नास्तीति यदुच्यते तर्हि एवं स्थिते अनेकग्रहणस्य प्रयोजनमुपसर्जनार्थमस्तीति बोद्धव्यम्। अनेकग्रहणसामर्थ्यात् सुपेति तृतीयान्तं परित्यज्य सुबिति प्रथमान्तमेवानुवर्तते। ततोऽनेकं सुबन्तं समस्यते इत्यर्थलाभेन, उत्तरपदस्यापि तत्रैवान्तर्भावेन 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (अष्टाध्यायी, ई. २००९, १/२/४३) इत्युपसर्जनसंज्ञया चित्रगुरित्यादौ गोशब्दादेः ह्रस्वादिसिद्धिः। यद्युपसर्जनार्थमनेकग्रहणं न क्रियेत तदा सुपा इति तृतीयान्तस्याप्यनुवृत्तौ गोशब्दस्य तृतीयया परामृष्टत्वेनाप्रथमानिर्दिष्टत्वेनानुपसर्जनत्वाद्ध्रस्वो न स्यात्। प्रथमानिर्दिष्टस्यैव प्रथमानिर्दिष्टं समास उपसर्जनम् इत्युपसर्जनत्वं करोति। न चानेकग्रहणाभावेऽपि 'एकविभक्ति चापूर्वनिपाते'(अष्टाध्यायी, ई. २००९, १/२/४४) इत्यनेन चित्रा यस्य गावः चित्रगुः तिष्ठति, चित्रगुं पश्य, चित्रगुणा कृतम्, चित्रगवे देहि, चित्रगोरानय, चित्रगोः स्वम्, चित्रगौ निदेहि इत्यादौ सर्वत्रान्यपदार्थप्राधान्येन दर्शनाद्यनेकक्रियायोग-प्रयुक्तानेकविभक्तित्वेऽपि वर्तिपदार्थस्य तत्त्वाभावात् सिद्धमुपसर्जनत्वमिति वाच्यम्। तादृशैकविभक्तित्वस्य तस्मिन्सूत्रेऽनाश्रयणात्। विग्रहे यन्नियतविभक्तिकमित्युक्तौ पर्यायेणापि न सर्वविभक्तित्वमित्यर्थः। यथा निष्कौशाम्बिरित्यत्रकौशाम्बीशब्दः निष्क्रमणक्रियापेक्षया अपादानशक्तिसम्बन्धात् पञ्चम्यन्तः। तस्य च क्रियान्तरापेक्षशक्त्यन्तराविर्भावो नास्तीति, अत

एवोपसर्जनत्वम्। विग्रहे यदेकविभक्तिकमित्युक्तौ प्रत्यासत्त्या विग्रहीयपदान्तरापेक्षया यदेकविभक्तिकमित्यर्थो लभ्यते (महाभाष्यप्रदीपोद्योतः २/२/२४ सूत्रव्याख्या)। एतादृशेऽर्थेऽस्वीकृते अथवा कुतश्चिदेव किञ्चित्पदमध्याहृत्य एकविभक्तियोगः क्रियते तदा राजकुमारी, तक्षकुमारी इत्यादावतिप्रसङ्गः स्यात्। राज्ञो या कुमारी राजकुमारी तिष्ठति, राज्ञो या कुमारी राजकुमारीं पश्य इत्यादौ समासरूपस्य प्रथमाद्वितीयादिनानाविभक्तिकत्वमाश्रित्य वर्तिपदार्थस्यैकविभक्तिकत्वेन उपसर्जनत्वं, ह्रस्वत्वं च स्यात्। अत एव राजकुमारी, तक्षकुमारी इत्यादौ उपसर्जनत्ववारणाय एकग्रहणसामर्थ्यादेकविभक्तिकस्य विग्रहीयपदान्तरापेक्षया यदेकविभक्तिकत्वमर्थापनमुपयुक्तं विभाति।

तथाहि राज्ञः कुमारी राजकुमारी इति षष्ठी समासे षष्ठ्यन्तस्य प्रथमान्तेनैव समासो वक्तव्येति कोऽपि नियमो नास्ति। यथा निष्कौशाम्बिरित्यत्र विग्रहे नियतविभक्तिर्दृश्यते तथात्र न दृश्यते। राजकुमारी इत्यत्र राज्ञः कुमारी, कुमार्या कुमार्यै इत्येवं द्वितीयाद्यन्तेनापि समाससम्भवात्। अतश्च कुमारीति शब्दस्य (उत्तरपदस्य) एकविभक्तित्वाभावात् उपसर्जनत्वाप्रसक्तिः। न चैकस्मिन्प्रयोगे कुमारीशब्दस्यैकविभक्तिकत्वात् स्यादेवोपसर्जनत्वमिति वाच्यम्, एकविभक्तिग्रहणात्। विभक्तियुक्तमपूर्वनिपाते इति न्यासे कर्तव्ये यदेकग्रहणं तस्यायमर्थः यन्नित्यमेकविभक्तियुक्तम् इति (महाभाष्यम्,२०२०,२/२/२४ सूत्रव्याख्या)। प्रयोगभेदेनापि विभक्त्यन्तररहितम् इत्यर्थः। अतो राजकुमारी इत्यादौ तत्पुरूषे चोपसर्जनत्वं कदापि न सम्भवति। बहुव्रीहिसमासे विशिष्य प्रथमान्तपदानां ग्रहणात् तस्या एव विग्रहे सम्भवात् 'एकविभक्ति चापूर्वनिपाते' इत्येवोपसर्जनत्वसिद्ध्या उपसर्जनार्थमनेकग्रहणं न कार्यमिति स्थितम्। यतो हि उपसर्जनसंज्ञापूर्वकं पूर्वप्रयोगस्यापि बाधा न जायते, सर्वत्र प्रथमान्तत्वात्। एतावता स्पष्टज्ञानार्थं, ज्ञापकक्लेशपरिहारार्थं च सूत्रकारेणानेकग्रहणं कृतमस्तीति विभावनीयम्।

### *अर्थग्रहणौचित्यम्*

अनेकमन्यपदे इतीयता सूत्रेणापि कार्यं प्रचलेत्, अन्यपदे वर्तमानमनेकं सुबन्तं समस्यते इत्यर्थावगमादन्यपदे(शब्दे) च सुबन्तानां वृत्तेरसम्भवात् प्रत्यासत्यार्थग्रहणं भवति। यतो हि शब्दे ह्यसम्भवादर्थे कार्यं विज्ञास्यते। सोऽयमेवं सिद्धे सति यदर्थग्रहणं करोति तस्यैतत्प्रयोजनं कृत्स्नः पदार्थोऽभिधीयते सद्रव्यः, सलिङ्गः, ससंख्यश्चेति (महाभाष्यम्, २०२०, २/२/२४ सूत्रव्याख्या)। अतो द्रव्यमेवाभिधीयते। एवञ्च अर्थग्रहणसामर्थ्यात् विभक्त्यर्थः सम्बन्धादिः आश्रयविशिष्टतया प्रतीयते। केवलं सम्बन्धस्य नाभिधानमपितु द्रव्यस्यैवाभिधानमिति सिध्यति। अभिधानादेव प्रथमा भवति। अर्थग्रहणस्यौचित्त्यं च तदेवोक्तं यथा—

*साधुत्वं न विभक्त्यर्थमात्रे वृत्तस्य दृश्यते।*

*कृत्स्नार्थवृत्तेः साधुत्वमित्यर्थग्रहणं कृतम्॥* (वाक्यपदीयम्,२०७७, २/२२५)। इति।

नन्वेवं कृत्वा द्रव्यलिङ्गसंख्यादीनां समासेनैव पदार्थाभिधाने लैङ्गाः, सांख्याश्च विधयो न स्युः, चित्रगुरित्यादौ षष्ठ्या इव सलिङ्गस्य ससंख्यस्य समासेनाभिधानात् इति चेदुच्यते लैङ्गेषु तावन्न दोषः। स्त्रियां वर्तमानं यत्प्रातिपदिकं ततः स्वार्थे टाबादय इति स्त्रियाः प्रातिपदिकस्य विशेषणत्वार्थाश्रयणात्। सांख्येष्वपि न दोषः। समासेन कर्मादिशक्त्यनाविष्टप्रातिपदिकार्थगतैकत्वस्योक्तावपि समासार्थानन्तर्गतक्रियादिनिरूपितकर्मत्वा-श्रयादिगतैकत्वादीनामनुक्तत्वात् वचनानि भवन्ति। चित्रगुणा कृतं, चित्रगुं पश्य इति यथा। यद्यपि प्रातिपदिकार्थमात्रगतसङ्ख्याभिधायिनी प्रथमा, तदेकत्वादेः समासेनोक्तत्वात् समासात् प्रथमा न प्राप्नोति, तथापि 'न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः' इति नियमात्समयकृता विभक्तिर्भवत्येव।

एवमपि प्रथमा समभिव्याहृतप्रातिपदिकार्थं बोधयितुमीष्टे न तु सम्बन्धम्। यदि च बहुव्रीहिणा पुनः सम्बन्धस्योक्तत्वेन तदनुवादिका षष्ठ्येवात्र स्यात्, चित्रगोर्देवदत्तस्यैतावन्मात्रं स्याद्, लिङ्गसङ्ख्याव्यभिचारेऽपि सम्बन्धस्याव्यभिचाराच्च इति चेत्, 'षष्ठी शेषे' इत्यत्रापि अनभिहिते इत्यस्य सम्बन्धात् शेषार्थस्य अनभिधाने एव षष्ठ्याः प्रवृत्तिः। चित्रगुरित्यादौ च अभिहितः सोऽर्थः अन्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति प्रातिपदिकार्थे प्रथमा निरबाधा (महाभाष्यम्, २०२०, २/२/२४ सूत्रव्याख्या)। अत अर्थग्रहणसामर्थ्येन न कुत्राप्यव्याप्त्यतिव्याप्तिदोषौ संभवतः।

## अनुप्रयोगसमाधानम्

ननु चित्रगुरित्यस्य चित्रा गावो यस्य इति विग्रहेणान्यपदार्थे बहुबीहिविधानात्तत्रानुप्रयुज्यमानस्य देवदत्तपदार्थग्य सम्बन्धत्वेन समासेनैवाभिधानात् चित्रगुर्देवदत्त इति अनुप्रयोगो न स्यात्, 'चार्थे द्वन्द्वः' (अष्टाध्यायी, ई.२००९, २/२/२९) इत्यनेन विहिते वटपिप्पलौ इत्यादौ द्वन्द्वे चशब्दप्रयोगाभाववत्। उक्तार्थानामप्रयोगः इति नियमश्च सुतरां प्रसिद्धः। तथा चोक्तं वाक्यपदीये-

*यथा स्वशब्दाभिहिते चैत्रार्थे न प्रयुज्यते।*

*चैत्रशब्दो बहुव्रीहावप्रयोगस्तथा भवेत्॥* (वाक्यपदीयम्, २०७७, २/२१०) इति।

एतत्समाधानायात्रोच्यते- चित्रगुरिति समासेन चित्रगवि सम्बन्धसामान्याभिधानेऽपि विशेष्यस्यानभिधानाद्देवदत्ताद्यनुप्रयुज्यमानानां पदानां प्रयोगः सुतरां सिध्यति। यथा च महाभाष्ये वार्तिकम् 'पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहितत्वात्' इत्याशङ्क्यैतत्समाधानाय 'न वानभिहितत्वात् सामान्याभिधाने हि विशेषानभिधानमिति' इत्युक्तम् (महाभाष्यम्, २०२०, २/२/२४ वार्तिकम्)। न च चित्रग्वादौ विशिष्टेऽन्यपदार्थे बहुव्रीहौ सत्यनुप्रयोगासिद्धिरिति वाच्यम्, शब्दशक्तिस्वाभाव्यात्तत्र पदार्थसामान्यस्यैव समासेनाभिधातुं शक्यत्वात्। तत्र विशेषार्थिनावश्यं विशेषोऽनुप्रयोक्तव्यः, कश्चित्रगुः ? इत्यस्योत्तरे देवदत्त इति। चित्रग्वादौ समासेन

स्वामिमात्रस्यैवार्थस्याभिधानं न तु विशेषाभिधानमिति। यथा गौरिति शब्देन गोसामान्यस्य न तु शुक्लकृष्णादेर्भानं तद्वत्। यथा चोक्तम्-

*यथा गौरिति शुक्लादेरभिधानं न विद्यते।*

*एवं यस्याभिसम्बन्धो गोभिस्तावत् प्रतीयते॥* (वाक्यपदीयम्,२०७७, २/२११) इति।

अथवा चित्रगुरित्यादौ समासेन कृत्स्नः पदार्थो नाभिधीयते। विभक्त्यर्थस्य सम्बन्धादेरेवाभिधानं भवति। अतश्च द्रव्यस्यानभिधानात् तद्वाचकः शब्दः अनुप्रयोक्तव्यः। न चैवमसत्वभूतस्य विभक्त्यर्थमात्रस्याभिधाने बहुयवम्, बहुयवा, बहुयवः, बहुयवौ, बहुयवाः इति लिङ्गसङ्ख्याभ्यामुपचारो न स्यात्। तथा च चित्रगुर्देवदत्त इति सामानाधिकरण्येन प्रयोगोऽपि नोपपद्यतेति वाच्यम्, आश्रयतो लिङ्गवचनसम्भवात्। विभक्त्यर्थश्च द्रव्यं श्रितो भवति तस्य यल्लिङ्गवचने ते समासस्यापि भवतः। चित्रग्वादिशब्दैः सामान्यसम्बन्धस्याभिधानेऽप्यभेदोपचारात् आश्रयाभेदमापन्नो विभक्त्यर्थ एव वाच्य इति (महाभाष्यम्, २०२०, २/२/२४ सूत्रवार्तिकम्)। अत एव सामान्यविशेषयोरभेदाच्चित्रगुर्देवदत्त इति सामानाधिकरण्येन प्रयोगोपपत्तिः। नन्वेवं सति बहुव्रीहिणा नियमेन सम्बन्धिबोधो न स्यात् इति चेदुच्यते तर्हि सूत्रेऽर्थग्रहणसामर्थ्याद् द्रव्यमेवाभिधीयत इति बोध्यम्। अतोऽनुप्रयोगादौ न कापि विप्रतिपत्तिः।

### वृत्तिपरिगणनविचारः

अत्र बहुव्रीहिसमासविधायके सूत्रे वार्तिकानां परिगणनं कार्यम्। पञ्चभिर्भुक्तमस्य इत्यादौ व्यधिकरणानामतिव्याप्तिवारणाय वृत्त्याश्रयपदानां परिगणनं कार्यम्। तत्र "बहुव्रीहिः सामानाधिकरणानामेव" इति वार्तिकं करणीयम्। अक्रियमाणे वार्तिके व्यधिकरणानामपि बहुव्रीहिसमासः स्यात्। वार्तिककारश्च शेषो बहुव्रीहिरिति सूत्रे शेषग्रहणस्य वैयर्थ्यं शङ्कते वार्तिककृत्। तत्र हि पदतः शेष उतार्थत इति शङ्कायां वार्तिककार आह 'पदतश्चेन्नाभावात्' इति। सामान्यविशेषरूपेण पदानामुक्तत्वात् अनुक्तपदाभावः। एवं तर्हि अर्थतः शेषो विज्ञायते। तत्रोक्तम् 'अर्थतश्चेदविशिष्टम्' इति (महाभाष्यम्, २०२०, २/२/४ सूत्रव्याख्या)। पूर्वोत्तरान्यपदार्थेषु अव्ययीभावतत्पुरुषयोर्विधानादनुक्तार्थाभावः। अतः शेषग्रहणं व्यर्थमिति वार्तिकाराभिमतम्। एतन्मते बहुव्रीहिः समानाधिकरणानामिति वक्तव्यम् अतिप्रसङ्गवारणाय। भाष्यकारस्तु त्रिकतः शेषं मन्यते "सप्तसु सुपां त्रिकेषु शृङ्गग्राहिकया यस्य समासो नोक्तः सः शेषः इति। प्रथमान्त इत्यर्थः" (महाभाष्यं तत्रस्थम्)। शेषग्रहणं प्राक्कडारात्परं कार्यमित्यस्मिन्पक्षे कर्तव्यम्, एकसंज्ञाधिकारपक्षे न कर्तव्यमित्याकडारसूत्र एव प्रतिपादितम्। अस्मिंश्च मते शेषग्रहणेनैव सामानाधिकरण्यं लभ्यत इति वार्तिकं नारम्भणीयम्।

यदीदं वार्तिककाराभिमतं वार्तिकमारभ्यते तर्हि उच्चैर्मुख इत्यादौ 'अव्ययानाञ्च' इत्यनेन बहुव्रीहिसमासकरणार्थमपि एतद्वार्तिकं परिगणनीयं जायते। यतोह्यत्र उच्चैर्नीचैरित्यादेरव्ययस्य सत्वेन प्रथमान्ताभावादसमानाधिकरणत्वाच्च समासस्य प्राप्तिर्न भवेदिति। तथैव कण्ठेस्थः कालो यस्य सः इति विग्रहे जायमानस्य कण्ठेकाल इत्यस्य सिद्ध्यर्थञ्च 'सप्तम्युपमानपूर्व(पद)स्योत्तरलोपश्च' इति वार्तिकमपि स्वीकर्तव्यम्। अन्यथा एकस्य कण्ठेस्थ इत्यस्य सप्तमीविभक्तिस्थत्वेनाप्रथमान्तत्वादसमानाधिरणत्वेन बहुव्रीहिर्न स्यात्। एतस्मादेव

वार्तिकाद् उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुखः इत्यस्यापि सिद्धिर्भवति। अत्रोपमानपूर्वपदस्य इवपदस्य सत्त्वादेव पूर्वसूत्रेणाप्राप्तिर्भवति। तथैव वार्तिकपरिगणने "समुदायविकारषष्ठ्याश्च" इति वार्तिकमपि परिगणनीयम्। उत्तरपदस्य लोपश्च वक्तव्यः। केशसमाहारश्चूडा यस्य इति विग्रहे केशचूडः निष्पद्यते, अत्र समाहारपदस्य लोपः बहुव्रीहिसमासश्च भवति। सुवर्णविकारोऽलङ्कारो यस्येति विग्रहे सुवर्णालङ्कारः, अत्रापि विकारस्य लोपेन बहुव्रीहिसमासकरणार्थं वार्तिकं परिगणनीयम्। 'प्रादिभ्यो धातुजस्य वा' इति वार्तिकपरिगणनाद् प्रपतितः पर्णः प्रपर्णः इत्यादौ उत्तरपदस्य पतितस्य लोपो बहुव्रीहिसमासश्च भवति। 'नञोऽस्त्यर्थानां च' इति वार्तिकपरिगणनेन अविद्यमानः पुत्रो यस्य स इति विग्रहे विद्यमानपदस्य लोपे बहुव्रीहिसमासे अपुत्र इत्यादिः सिध्यति। अत उपर्युक्तलक्ष्यसिद्ध्यर्थं वचनान्येवारम्भणीयानि (महाभाष्यम्, २०२०, २/२/२४)। उपर्युक्तवार्तिकानां परिगणनेनोत्तरपदलोपसंघातलोपपूर्वकं बहुव्रीहिसमासो भवति। किञ्च संघातादिलोपस्य तत्र विद्यमानत्वात्तत्र संघातादेरर्थस्य भानन्तु तत्र न स्यादिति तु न शङ्क्यम्, समासस्यैकार्थीभावत्वेन वैयाकरणनये विशिष्टे शक्तिस्वीकारात्। अत एवावयवादिविकारलोपेऽपि समुदायशक्त्या आश्रयणेन यथायथमर्थो भवति। तदुक्तञ्च-'समासादिपञ्चसु विशिष्टे एव शक्तिर्न त्ववयवे रथन्तरं, सप्तपर्णः, शुश्रूषेत्यादौ अवयवार्थानुभवाभावात्' (परमलघुमञ्जूषा, २०४१, पृ. २९४)।

किञ्च शेषग्रहणाभावे उपर्युक्तादिवचनारम्भेऽपि पञ्च भुक्तवन्तोऽस्य इत्यादौ समानाधिकरणस्य सत्त्वादत्र बहुव्रीहिवारणायानभिधानस्यैव शरणीकर्तव्यतया तेनैव पञ्चभिर्भुक्तमस्येत्यसमानाधिकरणानामपि समासाभावः सिद्धो भवति। अत एव बहुव्रीहिः समानाधिकरणानामेव, अव्ययानाञ्चेत्यादि वृत्तिपरिगणनञ्चानावश्यकम्। एवञ्च त्रिकतः शेषः इत्येतदर्थमपि शेषग्रहणं न कार्यमिति तत्प्रत्याख्यातप्रायम्।

यदि च मन्दबुद्धीनामनुग्रहाय वृत्तिपरिगणनं क्रियते तर्हि वृत्तिपरिगणनमिव वर्तिपरिगणनम् (अर्थपरिगणनम्) अपि कार्यम्। कष्टं श्रितमनेन इत्यादौ बहुव्रीहिवारणाय मत्वर्थे बहुव्रीहिरिति वाच्यम्। षष्ठीसप्तम्योरर्थो मत्वर्थः। अत एव 'संख्ययाव्ययासन्नादूराधिकसङ्ख्याः संख्येये' (अष्टाध्यायी, ई. २००९, २/२/२५) इति सूत्रं चरितार्थम्। अन्यथा समस्यमानसङ्ख्यायाः संख्येयरूपान्यपदार्थवृत्तेः 'अनेकमन्यपदार्थे' इति सूत्रेणैव समासे सिद्धे सूत्रारम्भो व्यर्थः स्यात्। इत्थञ्च परिगणने क्रियमाणेऽक्रियमाणे वा पञ्च भुक्तवन्तोऽस्य इत्यादौ समासवारणायानभिधानमाश्रयणीयमेव (महाभाष्यम्, २०२०, २/२/२४ सूत्रव्याख्या)। अनेनैव न्यायेन पञ्चभिर्भुक्तमस्य, वृष्टे देवे गतः इत्यादौ समासवारणसम्भवे 'बहुव्रीहिः समानाधिकरणानाम्' इति, 'अप्रथमायाः' इति च वार्तिकं न कर्तव्यं भवतीति सर्वेष्टसिद्धिः। अतो वार्तिकाभावेऽपि सर्वेष्टसिद्धिसत्त्वेऽनभिधानस्यैव स्वीकरणीये तेनैव सर्वं सिध्यतीति भावः।

## निष्कर्षः

पाणिनीयाष्टकस्य समासप्रकरणस्य बहुव्रीहिसमासविधायकं सूत्रम् अनेकमन्यपदार्थे इति सार्थकं गुरुत्वयुक्तञ्चास्ति। अनेकप्रथमान्तस्य सुबन्तस्यान्यपदार्थे वर्तमानत्व एव सूत्रमिदं बहुव्रीहिसमासं करोति। शेषस्यानुवृत्तिकरणेन प्रथमार्थस्य लाभो भवति। अत्र सूत्रे वार्तिकारमतानुसारं शेषस्यानुवृत्तिर्न जायतेऽतः बहुव्रीहिसमानाधिकरणानाम्, मत्वर्थे बहुव्रीहिः इत्यादीनां परिगणनं कर्तव्यम्। पञ्चभिर्भुक्तमस्य इत्यादौ व्यधिकरणस्थले कष्टं श्रितमनेन इत्यादौ समानाधिकरणस्थलेऽपि वार्तिकद्वयस्य परिगणनेन बहुव्रीहिसमासनिवृत्तिर्भवतीति फलं सिध्यति। भाष्यकारमते सूत्रकारमते च शेषस्य ग्रहणं प्राक्कडारात्परं कार्यमित्यस्मिन्पक्षे कर्तव्यम्, एकसंज्ञाधिकारे च न कर्तव्यमिति। तदा शेषश्च येषां पदानां यस्मिन्नर्थेऽव्ययाभावादिकः

समासो न विहितः स शेष इत्यर्थः। भाष्यकारानुसारञ्च यस्य त्रिकस्य शृङ्गग्राहिकया समासो नोक्तः, यथा प्रथमायाः, स शेषः। अतः प्रथमाया लाभो भवति, तदनेकपदेन सह सामानाधिकरणेनानेकं सुबन्तं प्रथमान्तमिति लाभो भवति। एतेनैव सामानाधिरण्यस्य लाभो भवति। पञ्च भुक्तवन्तोऽस्य इत्यादौ चानभिधाने न बहुव्रीहिः इत्यस्यैव स्वीकरणीयतया वार्तिकद्वयपरिगणनाभावेऽपि सर्वं सिध्यतीति मन्तव्यम्। चित्रगुर्देवदत्त इत्यादावुदाहरणे सामान्यार्थस्य समासेनाभिधानेऽपि विशेषाभिधानाभावादनुप्रयोगानां नानुपपत्तिः। अथवार्थग्रहणसामार्थ्याच्चानुप्रयोगे न दोष इत्युक्तम्। तथैव समासविधायकस्यैतत्सूत्रस्य दलस्थपदानाञ्च प्रयोजनमप्यभिहितम्। पदप्रयोगस्यौचित्यञ्च वाक्यार्थे समासाभावाय पदार्थ एव समासकरणार्थमस्तीति विभाव्यते। एवञ्चानेकग्रहणं पूर्वमनेकपदानां समासकरणाय स्वीकृत्य 'तद्धितार्थोत्तरपदसमाहारे च' इत्यादिज्ञापकसिद्धत्वनेनानेकग्रहणस्यान्यथासिद्धत्वात् खलूपसर्जनार्थमिति प्रकल्प्यान्ते विष्पष्टार्थं चार्थे द्वन्द्वः इत्यादावनुवृत्त्यर्थञ्च स्वीकृतमस्ति। अन्यग्रहणस्य प्रयोजनञ्च विशेषतो बहुव्रीहितत्पुरूषयोर्विषयविभागस्य ज्ञापनार्थमस्ति, अन्यपदार्थे वर्तमाने सुबन्तानां बहुव्रीहिरेव भवतीति ज्ञापनार्थमस्तीति स्वीकृतम्। अर्थग्रहणौचित्त्यं खलु कृत्नः पदार्थो यथा विज्ञायेत, सद्रव्यः, ससंख्यः सलिङ्गः। अत एव टाबादयः भवन्तीति सिद्धम्। चित्रगुः, प्राप्तोदकः, ऊढरथः इत्यादिषूपयोगः। एतावता सूत्रस्यैतास्य बहुव्रीहिसमासे बहु महत्त्वम्, उपयोगित्वञ्च दृश्यते।

## कृतज्ञताज्ञापनम्

प्रस्तुतस्यालेखस्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च सम्यक्परीक्षणं विधाय परिष्काराय सम्पादनाय च महदुपकारं कृतवद्भ्यो प्राविधिकविषयविज्ञगुरुजनेभ्योऽन्येभ्यः सहयोगिभ्यश्च सश्रद्धं सधन्यवादञ्च कृतज्ञतां विनिवेदयामि।

## सन्दर्भसामग्रीसूची

*अष्टाध्यायी*, (ई. २००९), (पाणिनिकृता, पुष्दीक्षितः,सम्पा.), ज्ञानभारती पब्लिकेशन्स ।
*काशिका*, (ई. २०१०), (वामनजयादित्यकृता,रघुवीरवेदालङ्कारः,व्या.), चौखम्बा ओरियन्टालिया।
*पदमञ्जरी*, (ई. १९८१), (हरदत्तकृता), उस्मानियाविश्वविद्यालयः।
*परमलघुमञ्जूषा*, (२०४१), (नागेशकृता, ज.त्रिपाठी, व्या.), कृष्णदास अकादमी।
*वाक्यपदीयम्*, (२०७७), (भर्तृहरिकृतम्, श.पाण्डेय, व्या.), चौखम्बा ओरियन्टालिया।
*वैयाकरणभूषणसारः*, (२०२९), (कौण्डभट्टकृतः,प्रभाकरमिश्रः,व्या.), अरविन्दमिश्रमकरन्दमिश्रौ।
*वैयाकरणसिद्धान्तकौमुदी*, (ई. २०२०), (भट्टोजिदीक्षितकृता), चौखम्बा सुरभारती प्रकाशन।
*व्याकरणमहाभाष्यम्*, (२०२०), (पतञ्जलिकृतम्, वेदव्रत,सम्पा.), हरयाणासाहित्यसंस्थानम्।
*व्याकरणमहाभाष्यप्रदीपः*, (२०२०),(कैयटकृतः, वेदव्रत, सम्पा.), हरयाणासाहित्यसंस्थानम्।
*व्याकरणमहाभाष्यप्रदीपोद्योतः*, (२०२०), (नागेशकृतः, वेदव्रतः, सम्पा.), हरयाणासाहित्यसंस्थानम्।